कदोषाणां निरस्तत्वात्। व्यतिरेकसहचारेण अन्वयव्याप्तेरेव ग्रहात् व्यतिरेकव्याप्त्याऽन्वयव्याप्तेरनुमानाद्वा न वैषम्यम्। नचोपनयवैयर्थ्यम्, गृहीतव्याप्तेरेव हेतोः पक्षे उपसंहारात् तदुक्तम्, "नियम्यत्वनियन्तृत्वे भावयोर्यादृशी मते। त एव विपरीते तु विज्ञेये तदभावयोः"। इति व्यवहारस्तु गन्धवती पृथिवीत्युपदेशादेव यथा कम्बुग्रीवादिमान् घटपदवाच्य इति। तथा कुत्रचिदेव घृतादौ मृदादौ च गन्धवत्त्वेनोपलक्षणेन पृथिवीत्वे पृथिवीपदप्रवृत्तिनिमित्तत्वं येनोपदेशाद् गृहीतम्, गन्धवत् सर्व्वं पृथिवीत्वेन प्रवृत्तिनिमित्तेन पृथिवीपदवाच्यं गन्धवत्त्वात् यन्नैवं तन्नैवमिति व्यतिरेकी तस्याप्यवतरत्येव। ननु भेदसाधकव्यतिरेकिणि भेदो वैधर्म्म्यं स्वरूपभेदो वा अन्योन्याभावो वा न तावदाद्यौ प्रत्यक्षत एव तदवगमात् न तृतीयः अभावभेदस्यापि साध्यत्वेन तदन्योन्याभावस्य तत्राभावात् तेन सह स्वरूपभेदे साध्ये साध्याननुगमादितिचेन्न अभावप्रतियोगिकान्योन्याभावस्यापि साध्यत्वात् स यद्यतिरिक्तस्तदाऽस्त्येव न चेत् स्वरूपमादाय तत्पर्य्यवसानात् वस्तुतोभिन्नएव तद्वैधर्म्म्यस्य तदन्योन्याभावव्याप्यत्वात्, नचानवस्था यावत्येवानुभवस्तावत्येऽविश्रामात् अन्यत्र त्वननुभवेनैव विश्रामात् यत्तु त्रयोदशान्योन्याभावास्त्रयोदशसु प्रसिद्धाः मिलिताः पृथिव्यां साध्यन्त इति तन्तुच्छं प्रत्येकं प्रसिद्धेरतन्त्रत्वात् मिलितप्रसिद्धेरभावात् किन्तु निर्गन्धत्वावच्छिन्नप्रतियोगिताकान्योन्याभावः साध्येत प्रतियोगितावच्छेदकभेदेनाभावभेदस्यावश्यकत्वात् स च घटादावेव प्रत्यक्षसिद्ध इत्युक्तत्वात्"। (जलाद्यष्टद्रव्याणि गुणादिभावपञ्चकञ्चेति त्रयोदश) तस्य चाश्रयनाशादेव नाशादनित्यत्वं यथाह कणादसू०।

"पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च" सू० "पृथिव्यादीनां वायन्तानामवयविनां रूपादयश्चत्वारोगुणा अनित्याः। यद्यप्यन्येऽपि गुणा अवयविषु वर्त्तमाना अनित्या एव,तथापि तेषामन्यतोऽपि विनाशः, रूपादयश्चत्वारोगुणा आश्रयनाशादेव नश्यन्ति न तु विरोधिगुणान्तरात्, द्रव्यानित्यत्वादिति द्रव्यस्याश्रयभूतस्यानित्यत्वादाश्रितानामनित्यत्वमित्यर्थः।" उप० वृ० "रूपादीनामनित्यत्वे यद्याश्रयानित्यत्वं तन्त्रं तदा नित्याश्रयवृत्तीनां नित्यत्वमित्याक्षेपबललभ्यमित्याह"। "एतेन नित्येषु नित्यत्वमुक्तम्।" सू० "रूपादीनामेव चतुर्णां नित्येष्वाश्रयेषु वर्त्तमानानां नित्यत्वमुक्तम् एतेनेति एतेनेति आश्रयानित्यत्वेनानित्यत्वाभिधानेनेत्यर्थः" उप० वृ०। एतेन मुक्तावल्यां सर्वगन्धोऽनित्य इत्युक्तिश्चिन्त्या। तस्य पाकजत्वमपि कणादसू० वृत्तौ उक्तं यथा

"कारणगुणपूर्वकाः पृथिव्यां पाकजाः" सू० "पाकजा रूपरसगन्धस्पर्शा इत्यर्थः कारणगुणपूर्वका इति रूपाश्रयस्य घटादेर्यत् समवायिकारणं कपालादि तद्गुणपूर्वकाः तथा च कपालरूपकारणैकार्थसमवायप्रत्यासत्त्या घटरूपाद्यसमवायिकारणम्, एवं रसादावपि"।

रूपादीनां पाकप्रकारः पाकजशब्दे वक्ष्यते। गुणगुणिनोरभेद इति वेदान्तिनो मन्यन्ते कणादसूत्रवृत्तौ तन्निरासितं यथा।

"ननु नीलपीतादयोगुणा द्रव्याभिन्ना एव धर्मधर्मिणोरभेदादितिचेन्न रूपं घटः स्पर्शोघट इत्यादिव्यवहारप्रसङ्गात्, ननु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादिप्रतीतिरितिचेन्न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपपत्तेः। भेदे प्रमाणे सति कल्पनेयं यथाकथञ्चिदुपपद्यते इति चेन्न चन्दनस्य रूपं चन्दनस्य गन्ध इत्यादिव्यपदेशबलाद्भेदसिद्धेः पटस्य रूपाभेदे पटवद्रूपमपि त्वगिन्द्रियेण गृह्येत पटमानयेत्युक्ते यत्किञ्चिद्रूपमानयेत् रूपमानयेत्युक्ते यत्किञ्चिद्द्रव्यमानयेत्। अस्तु तर्हि भेदाभेदः अत्यन्तभेदेऽत्यन्ताभेदे च सामानाधिकरण्यानुपपत्तेरितिचेन्न अवच्छेदभेदं विना विरुद्धयोर्भेदाभेदयोरेकत्रासम्भवात्, अन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति नित्याभाववृत्तिधर्मत्वादत्यन्ताभावत्ववदितिचेन्न एकत्र संयोगतदत्यन्ताभावयोः प्रतीतिबलादत्यन्तभावस्याव्याप्यवृत्तित्वाभ्युपगमात् अन्योन्याभावे तु तथाप्रतीतेरभावात्।"

वेदान्तिमते तु तत्सत्त्वनियतसत्ताकत्वरूपतादात्म्यस्यैवाभेदत्वस्वीकारात् न तद्दोषावतारः। अतएवोक्तं "सत्यैक्ये मिथोभेदस्तादात्म्यमिति"। ऐक्ये तत्सत्त्वनियतसत्ताकत्वे सति मिथः परस्परं भेदः इति तैरभ्युपगमान्न किञ्चिद्दूषणमवहतीति।

"रूपरसगन्धस्पर्शाः रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः।" इत्युपक्रम्य उप०वृत्तौ तल्लक्षणमुक्तं यथा

"घ्राणमात्रग्राह्यो गुणो गन्धः घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं स च सुरभिरसुरभिश्चेति द्विविधः, यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं गन्धत्वम्।